# ॥ वाल्मीकि रामायण ॥

## २ अयोध्याकाण्ड

### अध्याय ८१

गुहस्य वचनं श्रुत्वा भरतो भृशमप्रियम् ।
ध्यानं जगाम तत्रैव यत्र तच्छ्रुतमप्रियम् ॥ १ ॥

सुकुमारो महासत्त्वः सिंहस्कन्धो महाभुजः ।
पुण्डरीक विशालाक्षस्तरुणः प्रियदर्शनः ॥ २ ॥

प्रत्याश्वस्य मुहूर्तं तु कालं परमदुर्मनाः ।
पपात सहसा तोत्रैर्हृदि विद्ध इव द्विपः ॥ ३ ॥

तदवस्थं तु भरतं शत्रुघ्नोऽनन्तर स्थितः ।
परिष्वज्य रुरोदोच्चैर्विसंज्ञः शोककर्शितः ॥ ४ ॥

ततः सर्वाः समापेतुर्मातरो भरतस्य ताः ।
उपवास कृशा दीना भर्तृव्यसनकर्शिताः ॥ ५ ॥

ताश्च तं पतितं भूमौ रुदन्त्यः पर्यवारयन् ।
कौसल्या त्वनुसृत्यैनं दुर्मनाः परिषस्वजे ॥ ६ ॥

वत्सला स्वं यथा वत्समुपगूह्य तपस्विनी ।
परिपप्रच्छ भरतं रुदन्ती शोकलालसा ॥ ७ ॥

पुत्रव्याधिर्न ते कच्चिच्छरीरं परिबाधते ।
अद्य राजकुलस्यास्य त्वदधीनं हि जीवितम् ॥ ८ ॥

त्वां दृष्ट्वा पुत्र जीवामि रामे सभ्रातृके गते ।
वृत्ते दशरथे राज्ञि नाथ एकस्त्वमद्य नः ॥ ९ ॥

कच्चिन्न लक्ष्मणे पुत्र श्रुतं ते किं चिदप्रियम् ।
पुत्र वा ह्येकपुत्रायाः सहभार्ये वनं गते ॥ १० ॥

स मुहूर्तं समाश्वस्य रुदन्नेव महायशाः ।
कौसल्यां परिसान्त्व्येदं गुहं वचनमब्रवीत् ॥ ११ ॥

भ्राता मे क्वावसद्रात्रिं क्व सीता क्व च लक्ष्मणः ।
अस्वपच्छयने कस्मिन्किं भुक्त्वा गुह शंस मे ॥ १२ ॥

सोऽब्रवीद्भरतं पृष्टो निषादाधिपतिर्गुहः ।
यद्विधं प्रतिपेदे च रामे प्रियहितेऽतिथौ ॥ १३ ॥

अन्नमुच्चावचं भक्ष्याः फलानि विविधानि च ।
रामायाभ्यवहारार्थं बहुचोपहृतं मया ॥ १४ ॥

तत्सर्वं प्रत्यनुज्ञासीद्रामः सत्यपराक्रमः ।
न हि तत्प्रत्यगृह्णात्स क्षत्रधर्ममनुस्मरन् ॥ १५ ॥

न ह्यस्माभिः प्रतिग्राह्यं सखे देयं तु सर्वदा ।
इति तेन वयं राजन्ननुनीता महात्मना ॥ १६ ॥

लक्ष्मणेन समानीतं पीत्वा वारि महायशाः ।
औपवास्यं तदाकार्षीद्राघवः सह सीतया ॥ १७ ॥

ततस्तु जलशेषेण लक्ष्मणोऽप्यकरोत्तदा ।
वाग्यतास्ते त्रयः सन्ध्यामुपासत समाहिताः ॥ १८ ॥

सौमित्रिस्तु ततः पश्चादकरोत्स्वास्तरं शुभम् ।
स्वयमानीय बर्हींषि क्षिप्रं राघव कारणात् ॥ १९ ॥

तस्मिन्समाविशद्रामः स्वास्तरे सह सीतया ।
प्रक्षाल्य च तयोः पादावपचक्राम लक्ष्मणः ॥ २० ॥

एतत्तदिङ्गुदीमूलमिदमेव च तत्तृणम् ।
यस्मिन्रामश्च सीता च रात्रिं तां शयितावुभौ ॥ २१ ॥

नियम्य पृष्ठे तु तलाङ्गुलित्रवाञ्
शरैः सुपूर्णाविषुधी परन्तपः ।
महद्धनुः सज्यमुपोह्य लक्ष्मणो
निशामतिष्ठत्परितोऽस्य केवलम् ॥ २२ ॥

ततस्त्वहं चोत्तमबाणचापधृक्
स्थितोऽभवं तत्र स यत्र लक्ष्मणः ।
अतन्द्रिभिर्ज्ञातिभिरात्तकार्मुकैर्
महेन्द्रकल्पं परिपालयंस्तदा ॥ २३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com